कालदष्टं विनिर्द्दिशेत् । दर्पणे सलिले वापि आत्मच्छायां न पश्यति । मन्दरश्मिं तथा दीप्तं तेजोहीनं दिवाकरम् । वेपते वेदनातस्तु रक्तनेत्रश्च जायते । स याति निधनं जन्तुः कालदष्टं विनिर्द्दिशेत् । अष्टम्याञ्च नवम्याञ्च कृष्णपक्षे चतुर्द्दशीम् । नागपञ्चमीदष्टानां जीवितस्य च संशयः । आर्द्राश्लेषामघाचाश्विनीकृत्तिकासु विशेषतः । विशाखासु त्रिपूर्वासु मूलास्वातिशताभके । सर्पदष्टा न जीवन्ति विषं पीतञ्च यैस्तथा । शून्यागारे श्मशाने च शुष्कवृक्षे तथैव च । न जीवन्ति नरा दष्टा नक्षत्रे तिथिसंयुते । अष्टोत्तरं मर्म्मशतं प्राणिनां समुदाहृतम् । तेषां मध्ये तु मर्म्माणि दश द्वे चापि कीर्त्तिते । शङ्खे नेत्रे भ्रुवोर्मध्ये वस्तिभ्यां वृषणान्तरे । कक्षे स्कन्धे हृदमध्ये तालुके चिबुके गुदे । एषु द्वादशकर्म्मसु दष्टः शस्त्रेण वा हतः । न जीवन्ति नरा लोके कालदष्टान् विनिर्द्दिशेत्" । दूतो वा दण्डहस्तो भवति च युगलं पाशहस्तस्तथा वा रक्तं वस्त्रञ्च कृष्णम् ह्यथ शिरसि गतम् चैकवस्त्रस्य दूतः । तैलाभ्यक्तश्च तद्वत् त्वरितगतियुतो मुक्तकेशश्च याति, यः कुर्य्यात् घोरशब्दं करचरणयुगैः प्राप्तकालस्य दूतः । नागोदयं प्रवक्ष्यामि ईशानेन तु भाषितम् । ब्रह्मणा तु पुरा सृष्टा यद्वा नागास्त्वनेकशः । अनन्तं भास्करं विद्यात् सोमं विद्यात्तु वासुकिम् । तक्षकं भूमिपुत्रन्तु कर्क्कोटञ्च बुधं विदुः । पद्मं बृहस्पतिं विद्यान्महापद्मञ्च भार्गवम् । कुलिकः शङ्खपालश्च द्वावेतौ तु शनैश्चरः । पूर्व्वपादः शङ्खपालो द्वितीयः कुलिकोऽस्य च । नैऋभागे यमौ दिष्टौ दिनरात्रौ तथैव च । शुक्रसोमौ च मध्याह्ने उदये तु समाहृतम् । प्रायः प्रागन्ते भागे दिवासन्ध्याविष्टोच्यते । पञ्चाश भुञ्जते राजन् ! पथि मृत्युं व्रजत्यधः । अधो गत्वा भवेत् सर्पौ निर्व्विषो नात्र संशयः" भविष्यपु० "आषाढाद्ये तथा ज्यैष्ठे प्रमाद्यन्ति भुजङ्गमाः । ततो नागो नागिनी च मैथुनं संप्रपद्यते । चतुरो वार्षिकान् मासान् नागी गर्भमधारयत् । ततः कार्त्तिकमासे तु अण्डकानि प्रसूयते । अण्डकानान्तु विज्ञेयं द्वे शते द्वे च विंशती । तान्येव भक्षयेत् सा तु मार्गेकं स्वयया त्यजेत् । हवर्णैकवर्णनिभात् पुमान् संजायतेऽण्डकात् । तानेव खादते सर्पो अहोरात्राणि विंशतिम् । अर्कोद्रुकसुवर्णाभात् दीर्घराजीवसन्निभात् । तस्मादुत्पाद्यते स्त्री वै अण्डकात्

ब्राह्मणसत्तम ! । शिरीषपुष्पवर्णाभादण्डकात्क्लीबपुंसकम् । ततो भिनत्ति चाण्डानि षण्मासेन तु गौतम ! । ततस्ते प्रीतिसम्बन्धात् स्नेहं बध्नन्ति बालकाः । ततोऽसौ सप्तरात्रेण कृष्णो भवति यत्नतः । आयुःप्रमाणं सर्पाणां शतं विंशोत्तरं स्मृतम् । मृत्युरष्टविधो ज्ञेयः सर्पाणाञ्च यथाक्रमम् । मयूरात् मानुषाद्वापि चकोरान्नकुलात्तथा । बिडालाच्चकुलाच्चैव वराहाद्वृश्चिकात्तथा । एतेभ्यो यदि मुच्येत जीवेद्धि शोत्तरं शतम् । सप्ताहे तु ततः पूर्व्वं दंष्ट्राणान्तु विरोहणम् । विषस्यागमनं तत्र विद्यते च पुनः पुनः । एवं ज्ञात्वा तु तत्त्वेन विषकर्म्म समारभेत् । एकविंशतिरात्रेण विषं दंष्ट्रासु जायते । नागी पार्श्वसमावर्त्ती बालसर्पस्तु उच्यते । पञ्चविंशतिरात्रस्तु सद्यः प्राणहरो भवेत् । षण्मासाज्जातमात्रस्तु कञ्चुकं वै प्रमुञ्चति । पादानाञ्चापि विज्ञेया द्वे शते द्वे च विंशती । गोलोमसदृशाः पादाः प्रविशन्ति क्रमन्ति च । सन्धीनां चास्य विज्ञेयं द्वे शते विंशती तथा । पांशुल्यश्चापि विज्ञेया द्वे शते विंशतिस्तथा । अकालजाता ये सर्पा निर्व्विषास्ते प्रकीर्त्तिताः । पञ्चसप्ततिवर्षाणि आयुस्तेषां प्रकीर्त्तितम् । रक्तपीतशुक्लदन्ता आनीला मन्दवेगिनः । एते अल्पायुषो ज्ञेया अल्पाहाराश्च भीरवः । एकस्यास्य भवेद्वक्त्रं द्वे जिह्वे च प्रकीर्त्तिते । दंष्ट्राश्चतस्रो विज्ञेया प्रजापतिवचो यथा । प्रथमा ब्रह्मदैवत्या द्वितीया विष्णुदैवता । तृतीया रुद्रदैवत्या चतुर्थी यमदैवता । हीना प्रमाणतः सा तु वामनेत्रं समाश्रिता । नास्यां मन्त्राः प्रयोक्तव्या नौषधं नैव भेषजम् । वैद्यः पराङ्मुखो याति मृत्युस्तस्या विलेखनात् । चिकित्सा न बुधैः कार्य्या तदन्तं तस्य जीवितम् । मकरीं मासिकीं विद्यात् करालीञ्च द्विमासिकीम् । कालरात्री भवेत् त्रीणि चतुरो यमदूतिका । मकरीं शस्त्रकं विद्यात् कराली काकपादिका । टङ्काकृतिः कालरात्री याम्या कूर्म्माकृतिः स्मृता । मकरी वातुला ज्ञेया कराली पैत्तिकी स्मृता । कफात्मिका कालरात्री यमदूती त्रिदोषिका । शुक्ला तु मकरी ज्ञेया कराली रक्तसन्निभा । कालरात्री भवेत् पीता कृष्णा च यमदूतिका" भविष्यपु० । कश्यप उवाच "सविषा दंष्ट्रयोर्मध्ये यमदूती तु चेद्भवेत् । न चिकित्सा बुधैः कार्य्या तं गतासुं विनिर्द्दिशेत् । प्रहरार्द्धं दिवारात्रौ एकैकं भुञ्जते त्वहिः । एकश्च समानस्य द्विताय षोड़शं